# bRihatpArAsharahorAshAstramh 41-45

# બૃહત્પારાશરહોરાશાસ્ત્રમ્ ૪૧-૪૫

## Document Information

Text title : bRihatpArAsharahorAshAstram.h 41-45

File name : par4145.itx

Category : jyotisha, sociology_astrology, bRihatpArAshara

Location : doc_z_misc_sociology_astrology

Transliterated by : Ahto Jarve ajarve at fms30.cca.rockwell.com

Proofread by : Ahto Jarve ajarve at fms30.cca.rockwell.com

Latest update : November 1, 2010

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 11, 2023

*sanskritdocuments.org*

# bRihatpArAsharahorAshAstramh 41-45

# બૃહત્પારાશરહોરાશાસ્ત્રમ્ ૪૧-૪૫

અથ વિશેષધનયોગાઽધ્યાયઃ ॥ ૪૧॥

અથાઽતઃ સમ્પ્રવક્ષ્યામિ ધનયોગં વિશેષતઃ ।
યસ્મિન્ યોગે સમુત્પન્નો નિશ્ચિતો ધનવાન્ ભવેત્ ॥ ૧॥

પણ્ચમે ભૃગુજક્ષેત્રે તસ્મિન્ શુક્રેણ સંયુતે ।
લાભે ભૌમેન સંયુક્તે બહુદ્રવ્યસ્ય નાયકઃ ॥ ૨॥

પંચમે તુ બુધક્ષેત્રે તસ્મિન્ બુધયુતો સતિ ।
ચન્દ્રે ભૌમે ગુરૌ લાભે બહુદ્રવ્યસ્ય નાયકઃ ॥ ૩॥

પણ્ચમે ચ રવિક્ષેત્રે તસ્મિન્ રવિયુતે સતિ ।
લાભે શનીન્દુજીવાઢ્યે બહુદ્રવ્યસ્ય નાયકઃ ॥ ૪॥

પંચમે તુ શનિક્ષેત્રે તસ્મિન્ શનિયુતે સતિ ।
લાભે રવીન્દુસંયુક્તે બહુદ્રવ્યસ્ય નાયકઃ ॥ ૫॥

પંચમે તુ ગુરુક્ષેત્રે તસ્મિન્ ગુરુયુતે સતિ ।
લાભે ચન્દ્રસુતે જાતો બહુદ્રવ્યસ્ય નાયકઃ ॥ ૬॥

પંચમે તુ કુજક્ષેત્રે તસ્મિન્ કુજયુતે સતિ ।
લાભસ્થે ભૃગુપુત્રે તુ બહુદ્રવ્યસ્ય નાયકઃ ॥ ૭॥

પંચમે તુ શશિક્ષેત્રે તસ્મિન્ શશિયુતે સતિ ।
શનૌ લાભસ્થિતે જાતો બહુદ્રવ્યસ્ય નાયકઃ ॥ ૮॥

ભાનુક્ષેત્રગતે લગ્ને તસ્મિન્ ભાનુયુતે પુનઃ ।
ભૌમેન ગુરુણા યુક્તે દૃષ્ટે જાતો યુતો ધનૈઃ ॥ ૯॥

ચન્દ્રક્ષેત્રગતે લગ્ને તસ્મિન્ ચન્દ્રયુતે સતિ ।
બુધેન ગુરુણા યુક્તે દૃષ્ટે જાતો ધની ભવેત્ ॥ ૧૦॥

ભૌમક્ષેત્રે ગતે લગ્ને તસ્મિન્ ભૌમેન સંયુતે ।
સૌમ્યશુક્રાર્કજૈર્યુક્તે દૃષ્ટે શ્રીમાન્નરો ભવેત્ ॥ ૧૧॥

બુધક્ષેત્રગતે લગ્ને તસ્મિન્ બુધયુતે સતિ ।
શનિજીવયુતે દૃષ્ટે જાતો ધનયુતો ભવેત્ ॥ ૧૨॥

ગુરુક્ષેત્રગતે લગ્ને તસ્મિન્ ગુરુયુતે સતિ ।
બુધભૌમયુતે દૃષ્ટે જાયતે ધનવાન્નરઃ ॥ ૧૩॥

ભૃગુક્ષેત્રગતે લગ્ને તસ્મિન્ ભૃગુયુતે સતિ ।
શનિસૌમ્યયુતે દૃષ્ટે યો જાતઃ સ ધની ભવેત્ ॥ ૧૪॥

શનિક્ષેત્રગતે લગ્ને તસ્મિન્ શનિયુતે સતિ ।
ભૌમેન ગુરુણા યુક્તે દૃષ્ટે જાતો ધનૈર્યુતઃ ॥ ૧૫॥

ધનદૌ ધર્મધીનાથૌ યે વા તાભ્યાં યુતા ગ્રહાઃ ।
તેઽપિ સ્વસ્વદશાકાલે ધનદા નાઽત્ર સંશયઃ ॥ ૧૬॥

ગ્રહાણામુક્તયોગેષુ ક્રૂરસૌમ્યવિભાગતઃ ।
બલાબલવિવેકેન ફલમૂહ્યં વિચક્ષણૈઃ ॥ ૧૭॥

કેન્દ્રેશઃ પારિજાતસ્થસ્તદા દાતા ભવેન્નરઃ ।
ઉત્તમે હ્યુત્તમો દાતા ગોપુરે પુરુષત્વયુક્ ॥ ૧૮॥

સિંહાસને ભવેન્માન્યઃ શૂરઃ પારાવતાંશકે ।
સભાધ્યક્ષો દેવલોકે બ્રહ્મલોકે મુનિર્મત ।
ઐરાવતાંશકે તૃષ્ટો દિગ્યોગો નૈવ જાયતે ॥ ૧૯॥

પારિજાતે સુતાધીશે વિદ્યા ચૈવ કુલોચિતા ।
ઉત્તમે ચોત્તમા જ્ઞેયા ગોપુરે ભુવનાંકિતા ॥ ૨૦॥

સિંહાસને તથા વાચ્યા સાચિવ્યેન સમન્વિતા ।
પારાવતે ચ વિજ્ઞેયા બ્રહ્મવિદ્યા દ્વિજોત્તમ ॥ ૨૧॥

સુતેશે દેવલોકસ્થે કર્મયોગશ્ચ જાયતે ।
ઉપાસના બ્રહ્મલોકે ભક્તિસ્ત્વૈરાવતાંશકે ॥ ૨૨॥

ધર્મેશે પારિજાતસ્થે તીર્થકૃત્ત્વત્ર જન્મનિ ।
પૂર્વજન્મન્યપિ જ્ઞેયસ્તીર્થકૃચ્ચોત્તમાંશકે ॥ ૨૩॥

ગૌપુરે મખકર્તા ચ પરે ચૈવાઽત્ર જન્મનિ ।

સિંહાસને ભવેદ્વીરઃ સત્યવાદી જિતેન્દ્રિયઃ ॥ ૨૪॥

સર્વધર્માન્ પરિત્યજ્ય બ્રહ્મૈકપદમાશ્રિતઃ ।
પારવતે ચ પરમો હંઅશ્ચૈવાત્ર જન્મનિ ॥ ૨૫॥

લગુડી વા ત્રિદણ્ડી સ્યાદ્દેવલોકે ન સંશયઃ ।
બ્રહ્મલોકે શક્રતદં યાતિ કૃત્વાઽશ્વમેધકમ્ ॥ ૨૬॥

ઐરાવતે તુ ધર્માત્મા સ્વયં ધર્મો ભવિષ્યતિ ।
શ્રીરામઃ કુન્તિપુત્રાદ્યો યથા જાતો દ્વિજોત્તમ ॥ ૨૭॥

વિષ્ણુસ્થાનં ચ કેન્દ્રં સ્યાલ્લક્ષ્મીસ્થાનં ત્રિકોણકમ્ ।
તદીશયોશ્ચ સમ્બન્ધાદ્રાજયોગઃ પુરોદિતઃ ॥ ૨૮॥

પારિજાતે સ્થિતૌ તૌ ચેન્નૃપો લોકાનુરક્ષકઃ ।
ઉત્તમે ચોત્તમો ભૂપો ગજવાજિરથાદિમાન્ ॥ ૨૯॥

ગોપુરે નૃપશાર્દૂલઃ પૂજિતાંઘ્રિર્નૃપૈર્ભવેત્ ।
સિંહાસને ચક્રવર્તી સર્વભૂમિપ્રપાલકઃ ॥ ૩૦॥

અસ્મિન્ યોગે હરિશ્ચન્દ્રો મનુશ્ચૈવોત્તમસ્તથા ।
બલિર્વૈશ્વાનરો જાતસ્તથાન્યે ચક્રવર્તિનઃ ॥ ૩૧॥

વર્તમાનયુગે જાતસ્તથા રાજા યુધિષ્ઠિરઃ ।
ભવિતા શાલિવાહાદ્યસ્તથૈવ દ્વિજસત્તમ ॥ ૩૨॥

પારાવતાંશકેઽપ્યેવં જાતા મન્વાદયસ્તથા ।
વિષ્ણોઃ સર્વેઽવતારાશ્ચ જાયન્તે દેવલોકકે ॥ ૩૩॥

બ્રહ્મલોકકે તુ બ્રહ્માદ્યા જાયન્તે વિશ્વપાલકાઃ ।
ઐરાવતાંશકે જાતઃ પૂર્વ સ્વાયંભુવો મનુઃ ॥ ૩૪॥

## અથ દારિદ્ર્યયોગાધ્યાયઃ ॥ ૪૨॥

બહવો ધનદા યોગા શ્રુતાસ્ત્વત્તો મયા મુને ।
દરિદ્રજન્મદાન્ યોગાન્ કૃપયા કથય પ્રભો ॥ ૧॥

લગ્નેશે ચ વ્યયસ્થાને વ્યયેશે લગ્નમાગતે ।
મારકેશયુતે દૃષ્ટે નિર્ધનો જાયતે નરઃ ॥ ૨॥

લગ્નેશે ષષ્ઠભાવસ્થે ષષ્ઠેશે લગ્નમાગતે ।
મારકેશેન યુગ્દૃષ્ટે ધનહીનઃ પ્રજાયતે ॥ ૩॥

લગ્નેન્દૂ કેતુસંયુક્તૌ લગ્નપે નિધનં ગતે ।
મારકેશયુતે દૃષ્ટે જાતો વૈ નિર્ધનો ભવેત્ ॥ ૪॥

ષષ્ઠાષ્ટમવ્યયગતે લગ્નપે પાપસંયુતે ।
ધનેશે રિપુભે નીચે રાજવંશ્યોઽપિ નિર્ધનઃ ॥ ૫॥

ત્રિકેશેન સમાયુક્તે પાપદૃષ્ટે વિલગ્નપે ।
શનિયુક્તેઽથવા સૌમ્યૈરદૃષ્ટે નિર્ધનો નરઃ ॥ ૬॥

મન્ત્રેશો ધર્મનાથશ્ચ ક્રમાત્ ષષ્ઠવ્યયસ્થિતૌ ।
દૃષ્ટૌ ચેન્મારકેશેન નિર્ધનો જાયતે નરઃ ॥ ૭॥

પાપગ્રહે લગ્નગતે રાજ્યધર્માધિપૌ વિના ।
મારકેશયુતે દૃષ્ટે જાતઃ સ્યન્નિર્ધનો ભવેત્ ॥ ૮॥

ત્રિકેશા યત્ર ભાવસ્થા તદ્ભાવેશાસ્ત્રિકસ્થિતાઃ ।
પાપદૃષ્ટયુત બાલો દુઃખાક્રાન્તશ્ચ નિર્ધનઃ ॥ ૯॥

ચન્દ્રાક્રાન્તનવંશેશો મારકેશયુતો યદિ ।
મારકસ્થાનગો વાઽપિ જાતોઽત્ર નિર્ધનો નરઃ ॥ ૧૦॥

લગ્નેશલગ્નભાગેશૌ રિશ્ફરન્ધ્રારિગૌ યદિ ।
મારકેશયુતૌ દૃષ્ટૌ જાતોઽસૌ નિર્ધનો નરઃ ॥ ૧૧॥

શુભસ્થાનગતાઃ પાપાઃ પાપસ્થાનગતાઃ શુભાઃ ।
નિર્ધનો જાયતે બાલો ભોજનેન પ્રપીડિતઃ ॥ ૧૨॥

કોણેશદૃષ્ટિહીના યે ત્રિકેશૈઃ સંયુતા ગ્રહાઃ ।
તે સર્વે સ્વદશાકાલે ધનહાનિકરાઃ સ્મૃતાઃ ॥ ૧૩॥

કારકાદ્ વા વિલગ્નાદ્ વા રન્ધ્રેરિષ્ફે દ્વિજોત્તમ ।
કારકાઙ્ગપયોદૃષ્ટ્યા ધનહીનઃ પ્રજાયતે ॥ ૧૪॥

કારકેશો વ્યયં સ્વસ્માત્ લગ્નેશો લગ્નતો વ્યયમ્ ।
વીક્ષતે ચેત્ તદા બાલો વ્યયશીલો ભવેદ્ધ્રુવમ્ ॥ ૧૫॥

અથ દારિદ્ર્યયોગાંસ્તુ કથયામિ સભઙ્ગકાન્ ।
ધનસંસ્થૌ તુ ભૌમાર્કી કથિતૌ ધનનાશકૌ ॥ ૧૬॥

બુધેક્ષિતૌ મહાવિત્તં કુરુતો નાત્ર સંશયઃ ।
નિઃસ્વતાં કુરુતે તત્ર રવિર્નિત્યં યમેક્ષિતઃ ॥ ૧૭॥

મહાધનયુતં ખ્યાતં શન્યદૃષ્ટઃ કરોત્યસૌ ।
શનિશ્ચાપિ રવેર્દૃષ્ટ્યા ફલમેવં પ્રયચ્છતિ ॥ ૧૮॥

---

## અથાયુર્દાયાધ્યાયઃ ॥ ૪૩॥

ધનાદ્યાખ્યયોગૌ ચ કથિતૌ ભવતા મુને ।
નરાણામાયુષો જ્ઞાનં કથયસ્વ મહામતે ॥ ૧॥

સાધુ પૃષ્ટં ત્વયા વિપ્ર જનાનાં ચ હિતેચ્છયા ।
કથયામ્યાયુષો જ્ઞાનં દુર્જ્ઞેયં યત્ સુરૈરપિ ॥ ૨॥

આયુર્જ્ઞાનવિભેદાસ્તુ બહુભિર્બહુધોદિતાઃ ।
તેષાં સારાંશમાદાય પ્રવદામિ તવાઽગ્રતઃ ॥ ૩॥

સ્વોચ્ચનીચાદિસંસ્થિત્યા ગ્રહા આયુઃપ્રદાયકાઃ ।
સ્વસ્વવીર્યવશૈર્નૈવં નક્ષત્રાણ્ ચ રાશયઃ ॥ ૪॥

પિણ્ડાયુઃ પ્રથમં તત્ર ગ્રહસ્થિતિવશાદહમ્ ।
કથયામિ દ્વિજશ્રેષ્ઠ શ્રણુષ્વેકાગ્રમાનસઃ ॥ ૫॥

ક્રમાત્ સૂર્યાદિખેટેષુ સ્વસ્વોચ્ચસ્થાનગેષ્વિહ ।
નન્દેન્દવસ્તત્ત્વમિતાસ્તિથયોઽર્કાઃ શરેન્દવઃ ॥ ૬॥

પ્રકૃયતો વિંશતિશ્ચાબ્દા આયુઃપિણ્ડાઃ પ્રકીર્તિતાઃ ।
નીચગેષ્વેતદર્ધઞ્ચ જ્ઞેયં મધ્યેઽનુપાતતઃ ॥ ૭॥

સ્વચ્ચશુદ્ધો ગ્રહઃ શોધ્યઃ ષડ્ભાદૂનો ભમણ્ડ્લાત્ ।
સ્વપિણ્ડગુણિતો ભક્તો ભાદિમાનેન વત્સરાઃ ॥ ૮॥

અસ્તગસ્તુ હરેત્સ્વાર્ધ વિના શુક્રશનૈશ્ચરૌ ।
વક્રચારં વિના ત્ર્યાંશાં શત્રુરાશૌ હરેદ્ ગ્રહઃ ॥ ૯॥

સર્વાર્ધત્રિચતુઃપઞ્ચષષ્ઠભાગં ક્રમાદ્ ગ્રહઃ ।
વ્યયાદ્વામં સ્થિતઃ પાપો હરેત્ સૌમ્યશ્ચ તદ્દલમ્ ॥ ૧૦॥

એકભે તુ બહુષ્વેકો હરેત્સ્વાંશાં બલી ગ્રહઃ ।

નાઽત્ર ક્ષીણસ્ય ચન્દ્રસ્ય પાપત્વં મુનિભિઃ સ્મૃતમ્ ॥ ૧૧॥

લગ્નાંશલિપ્તિકા હત્વા પ્રત્યેકં વિહગાયુષા ।
ભાજ્યા મણ્ડલલિપ્તાભિર્લબ્ધં વર્ષાદિ શોધયેત્ ॥ ૧૨॥

સ્વાયુષો લગ્નગે સૂર્યે મઙ્ગલે ચ શનૈશ્ચરે ।
તદર્ધં શુભસંદૃષ્ટે પાતયેદ્ દ્વિજસત્તમ ॥ ૧૩॥

લગ્નરાશિસમાશ્ચાબ્દા ભાગાદ્યૈરનુપાતતઃ ।
માસાદિકા ઇતીચ્છન્તિ લગ્નાયુઃ કેઽપિ કોવિદાઃ ॥ ૧૪॥

લગ્નાદાયોંઽશતુલ્યઃ સ્યાદન્તરે ચાઽનુપાતતઃ ।
તત્પતૌ બલસંયુક્તે રાશિતુલ્યં ચ ભાધિપે ॥ ૧૫॥

અથ વિપ્ર નિસર્ગાયુઃ ખેટાનાં કથયામ્યહમ્ ।
ચન્દ્રારજ્ઞસિતેજ્યાર્કશનીનાં ક્રમશોબ્દકા ॥ ૧૬॥

એકદ્વયંકનખા ધૃત્યઃ કૃતિઃ પંચાશદેવ હિ ।
જન્મકાલાત્ ક્રમાજ્ જ્ઞેયા દશાશ્ચૈતા નિસર્ગજાઃ ॥ ૧૭॥

અથાંશાયુ સલગ્નાનાં ખેટાનાં કથયામ્યહમ્ ।
નવાંશ્રાશિતુલ્યાનિ ખેટો વર્ષાણિ યચ્છતિ ॥ ૧૮॥

ભાદિં ખગં ખગૈઃ સૂર્યૈર્હત્વા તદ્ભગણાદિકમ્ ।
કૃત્વાઽર્ક્કશેષિતં જ્ઞેયમબ્દાદ્યંશાયુષઃ સ્ફુટમ્ ॥ ૧૯॥

પિણ્ડાયુરિવ તત્રાપિ હાનિં કુર્યાદ્ વિચક્ષણઃ ।
અત્રાઽપરો વિશેષોઽપિ કૈશ્ચિદ્ વિજ્ઞૈરુદાહૃતઃ ॥ ૨૦॥

સાધિતાયુઃ ખગે સ્વોચ્ચે સ્વર્ક્ષે વા ત્રિગુણં સ્મૃતમ્ ।
દ્વિગુણં સ્વનવાંશસ્થે સ્વદ્રેષ્કાણે તથોત્તમે ॥ ૨૧॥

ઉભયત્ર ગતે ખેટે કાર્યં ત્રિગુણમેવ હિ ।
હાનિદ્વયેઽર્ધહાનિઃ સ્યાદિત્યાયુઃ પ્રસ્ફુટં નૃણામ્ ॥ ૨૨॥

એવં સંસાધ્ય ચાન્યેષાં હન્યાત્ સ્વસ્વપરાયુષા ।
નૃણાં પરાયુષા ભક્ત્વા તેષામાયુઃ સ્ફુટં ભવેત્ ॥ ૨૩॥

અથાયુઃ પરમં વક્ષ્યે નાનાજાતિસમુદ્ભવમ્ ।
અનન્તસંખ્યં દેવાનામૃષીણાં ચ દ્વિજોત્તમ ॥ ૨૪॥

ગૃધ્રોલૂકશુકધ્વાંક્ષસર્પાણાં ચ સહસ્રકમ્ ।
શ્યેનવાનરભલ્લુકમણ્ડૂકાનાં શતત્રયમ્ ॥ ૨૫॥

પંચશદુત્તરશતં રાક્ષસાનાં પ્રકીર્તિતમ્ ।
નગણાં કુઞ્જરાણાં ચ વિંશોત્તરશતં તથા ॥ ૨૬॥

દ્વાત્રિંશદ્ ઘોટકાનાઞ્ચ પંચવિંશત્ ખરોષ્ટ્રયોઃ ।
વૃષાણાં મહિષાણાં ચ ચતુર્વિંશતિવત્સરમ્ ॥ ૨૭॥

વિંશત્યાયુર્મયૂરાણાં છાગાદીનાં ચ ષોડશ ।
હંસાનાં પંચનવ ચ પિકાનાં દ્વાદશાબ્દકાઃ ॥ ૨૮॥

શુનાં પારાવતાનાં ચ કુક્કુટાનાં દ્વાદશાબ્દકાઃ ।
બુદ્બુદાદ્યણ્ડજાનાં ચ પરાયુઃ સપ્તવત્સરાઃ ॥ ૨૯॥

યદેતદધુના પ્રોક્તં ત્રિધાયુદ્વિજસત્તમ ।
તેષુ કિઞ્ચ કદા ગ્રાહ્યમિતિ તે કથયામ્યહમ્ ॥ ૩૦॥

વિલગ્નપે બલોપેતે શુભદૃષ્ટેંશશસમ્ભવભ્ ।
રવૌ પિંડોદ્ભવં ગ્રાહ્યં ચન્દ્રે નૈસર્ગિકં તથા ॥ ૩૧॥

બલસામ્યે દ્વયોર્યોગદલમાયુઃ પ્રકીર્તિતમ્ ।
ત્રયાણાં ત્રિયુતેસ્ત્ર્યંશસમં જ્ઞેયં દ્વિજોત્તમ ॥ ૩૨॥

અથાઽન્યદપિ વક્ષ્યામિ શ્રિણુ ત્વં દ્વિજસત્તમ ।
કેશ્ચિલ્લગ્નાષ્ટમેશાભ્યાં મન્દેન્દુભ્યાં તથૈવ ચ ॥ ૩૩॥

લગ્નહોરાવિલગ્નાભ્યાં સ્ફુટમાયુઃ પ્રકીર્તિતમ્ ।
આદૌ લગ્નાષ્ટમેશાભ્યાં યોગમેકં વિચિન્તયેત્ ॥ ૩૪॥

દ્વિતીયં મન્દચન્દ્રાભ્યાં યોગં પશ્યેદ્ દ્વિજોત્તમ ।
લગ્નહોરાવિલગ્નાભ્યાં તૃતીયં પરિચિન્તયેત્ ॥ ૩૫॥

ચરરાશૌ સ્થિતૌ દ્વૌ ચિત્ તદા દીર્ઘમુદાહૃતમ્ ।
એકઃ સ્થિરેઽપરો દ્વન્દ્વે દીર્ઘમાયુસ્તથાપિ હિ ॥ ૩૬॥

એકશ્ચરે સ્થિરેઽન્યશ્ચેત્ તદામધ્યમુદાહૃતમ્ ।
દ્વૌ વા દ્વન્દ્વે સ્થિતૌ વિપ્ર મધ્યમાયુસ્તથાપિ ચ ॥ ૩૭॥

એકશ્ચરેઽપરો દ્વન્દ્વે દ્વૌ વા સ્થિરગતૌ તદા ।
જાતકસ્ય તદાઽલ્પાયુર્જ્ઞેયમેવં દ્વિજોત્તમ ॥ ૩૮॥

યોગત્રયેણ યોગાભ્યાં સિદ્ધં યદ્ ગ્રાહ્યમેવ તત્ ।
યોગત્રયવિસંવાદે લગ્નહોરાવિલગ્નતઃ ॥ ૩૯॥

લગ્ને વા સપ્તમે ચન્દ્રે ગ્રાહ્યં મન્દેન્દુતસ્તદા ।
હ્રાસો વૃદ્ધિશ્ચ કક્ષ્યાયા વિચિન્ત્યા સર્વદા બુધૈઃ ॥ ૪૦॥

દીર્ઘે યોગત્રયેણૈવં નખચન્દ્રસમાબ્દકાઃ ।
યોગદ્વયેન વસ્વાશા યોગૈકેન રસાંકકાઃ ॥ ૪૧॥

મધ્યે યોગત્રયેણૈવં ખાષ્ટતુલ્યાબ્દકાઃ સ્મૃતાઃ ।
દ્વ્યગા યોગદ્વયેનાઽત્રયોગૈકેનાબ્ધિષણ્મિતાઃ ॥ ૪૨॥

અલ્પે યોગત્રયેણાઽત્રદ્વાત્રિંશન્મિતવત્સરાઃ ।
યોગદ્વયેન ષટ્ત્રિંશાત્ યોગૈકેન ચ ખાબ્ધયઃ ॥ ૪૩॥

એવં દીર્ઘસમાલ્પેષુ ખાબ્ધયો રસવહ્નયઃ ।
ખણ્ડા દન્તમિતાસ્તેભ્યઃ સ્ફુટમાયુઃ પ્રસાધયેત્ ॥ ૪૪॥

પૂર્ણં રાશ્યાદિગે ચાન્તે હાનિર્મધ્યેઽનુપાતતઃ ।
યોગકારકખેટાંશયોગસ્તત્સંખ્યયા હૃતઃ ॥ ૪૫॥

લબ્ધાંશાસ્તુ યથાપ્રાપ્તખણ્ડઘ્નાસ્ત્રિંશતોદ્ધૃતાઃ ।
લબ્ધવર્ષાદિભિર્હીનં પ્રાપ્તાયુઃ પ્રસ્ફુટં ભવેત્ ॥ ૪૬॥

યોગહેતૌ શનૌ કક્ષ્યાહ્રાસોઽન્યૈર્વૃદ્ધિરુચ્યતે ।
ન સ્વર્ક્ષતુઙ્ગગે નો વા પાપમાત્રયુતેક્ષિતે ॥ ૪૭॥

લગ્નસપ્તમગે જીવે શુભમાત્રયુતેક્ષિતે ।
કથિતસ્યાયુષો વિપ્ર કક્ષ્યાવૃદ્ધિઃ પ્રજાયતે ॥ ૪૮॥

અનાયુશ્ચેદ્ ભવેદલ્પમલ્પાન્મધ્યં પ્રજાયતે ।
મધ્યમાજ્જાયતે દીર્ઘં દીર્ઘાયુશ્ચેત્તતોઽધિકમ્ ॥ ૪૯॥

યોગહેતૌ ગુરવેવં કક્ષ્યાવૃદ્ધેશ્ચ લક્ષણમ્ ।
એતસ્માદ્ વૈપરીત્યેન કક્ષ્યાહ્રાસઃ શનૌ ભવેત્ ॥ ૫૦॥

આયુષો બહુધા ભેદાઃ કથિતા ભવતાઽધુના ।
કતિધા સા કદાઽનાયુરમિતાયુઃ કદા ભવેત્ ॥ ૫૧॥

બાલારિષ્ટં યોગારિષ્ટમલ્પં મધ્યઞ્ચ દીર્ઘકમ્ ।

દિવ્યં ચૈવાઽમિતં ચૈવં સપ્તધાયુઃ પ્રકીર્તિતમ્ ॥ ૫૨॥

બાલારિષ્ટે સમા અષ્ટૌ યોગારિષ્ટે ચ વિંશતિઃ ।
દ્વાત્રિંશદ્ વત્ररा અલ્પે ચતુષ્ષષ્ટિસ્તુ મધ્યમે ॥ ૫૩॥

વિંશાધિકશતં દીર્ઘે દિવ્યે વર્ષસહસ્રકમ્ ।
તદૂર્ધ્વમમિતં પુણ્યૈરમિતૈરાપ્યતે જનૈઃ ॥ ૫૪॥

ચન્દ્રેજ્યૌ ચ કુલીરાંગે જ્ન્!અસિઅતુ કેન્દ્રસંસ્થિતૌ ।
અન્યે ત્ર્યાયારિગાઃ ખેટા અમિતાયુસ્તદા ભવેત્ ॥ ૫૫॥

સૌમ્યાઃ કેન્દ્રત્રિકોણસ્થાઃ પાપાસ્ત્ર્યાયારિગાસ્તથા ।
શુભરાશૌ સ્થિતે રન્ધ્રે દિવ્યમાયુસ્તદા ભવેત્ ॥ ૫૬॥

ગોપુરાંશે ગુરૌ કેન્દ્રે શુક્રે પારાવતાંશકે ।
ત્રિકોણે કર્કટે લગ્ને યુગાન્તાયુસ્તદા દ્વિજ ॥ ૫૭॥

દેવલોકાંશકે મન્દે કુજે પારાવતાંશકે ।
ગુરૌ સિંહાસનાંશેઽઙ્ગે જાતો મુનિસમો ભવેત્ ॥ ૫૮॥

સુયોગૈર્વર્ધ્યતે હ્યાયુઃ કુયોગૈર્હીયતે તથા ।
અતો યોગાનહં વક્ષ્યે પૂર્ણમધ્યાલ્પકારકાન્ ॥ ૫૯॥

કેન્દ્રે શુભગ્રહૈર્યુક્તે લગ્નેશે ચ શુભાન્વિતે ।
સન્દૃષ્ટે ગુરુણા વાઽપિ પૂર્ણમાયુયુસ્તદા ભવેત્ ॥ ૬૦॥

કેન્દ્રસ્થિતે વિલગ્નેશે ગુરુશુક્રસમન્વિતે ।
તાભ્યાં નિરીક્ષિતે વાઽપિ પૂર્ણમાયુર્વિનિર્દિશેત્ ॥ ૬૧॥

ઉચ્ચસ્થિતૈસ્ત્રિભિઃ ખેટૈર્લગ્નરન્ધ્રશસંયુતૈઃ ।
અષ્ટમે પાપહીને ચ પૂર્ણમાયુર્વિનિર્દિશેત્ ॥ ૬૨॥

અષ્ટમસ્થૈસ્ત્રિભિ ખેટૈઃ સ્વોચ્ચમિત્રસ્વવર્ગગૈઃ ।
લગ્નેશે બલસંયુક્તે દીર્ઘમાયુસ્તદા ભવેત્ ॥ ૬૩॥

સ્વભોચ્ચસ્થેન કેનાપિ નભૌગેન સમન્વિતઃ ।
અષ્ટમેશઃ શનિર્વાપિ દીર્ઘમાયુર્વિનિર્દિશેત્ ॥ ૬૪॥

ત્રિષડાયગતૈઃ પાપૈઃ શુભૈઃ કેન્દ્રત્રિકોણગૈઃ ।
લગ્નેશે બલસંયુક્તે દીર્ઘમાયુર્વિનિર્દિશેત્ ॥ ૬૫॥

ષટ્સપ્તરન્ધ્રભવેષુ શુભખેટયુતેષુ ચ ।
ત્રિભવેષુ ચ પાપેષુ પૂર્ણમાયુર્વિનિર્દિશેત્ ॥ ૬૬॥

શત્રુવ્યયગતાઃ પાપા લગ્નેશો યદિ કેન્દ્રગઃ ।
રવિમિત્રં ચ રન્ધ્રેશઃ પૂર્ણમાયુસ્તથાપિ હિ ॥ ૬૭॥

આયુઃ સ્થાનસ્થિતાઃ પાપાઃ કર્મેશઃ સ્વોચ્ચગો યદા ।
તથાપિ દીર્ઘમાયુ સ્યાત્ વિજ્ઞેયં દ્વિજસત્તમ ॥ ૬૮॥

દ્વિસ્વભાવગૃહે લગ્ને લગ્નેશે કેન્દ્રસંસ્થિતે ।
સ્વોચ્ચરાશિત્રિકોણે વા દીર્ઘમાયુર્વિનિર્દિશેત્ ॥ ૬૯॥

દ્વિસ્વભાવગૃહે લગ્ને લગ્નેશાદ્ બલસંયુતાત્ ।
દ્વૌ પાપૌ યદિ કેન્દ્રસ્થૌ દીર્ઘમાયુસ્તદા ભવેત્ ॥ ૭૦॥

લગ્નાષ્ટમેશયોર્મધ્યે યઃ ખેટઃ પ્રબલો ભવેત્ ।
તસ્મિન્ કેન્દ્રગતે દીર્ઘ મધ્યં પણફરસ્થિતે ॥ ૭૧॥

આપોક્લિમે સ્થિતે સ્વલ્પમાયુર્ભવતિ નિશ્ચિતમ્ ।
લગ્નેશે ચ રવેર્મિત્રે દીર્ઘમાયુઃ સમે સમમ્ ॥ ૭૨॥

શત્રૌ સ્વલ્પં વદેદિત્થમષ્ટમેશાદપિ સ્મૃતમ્ ।
મિત્રમધ્યાઽરિભાવસ્થે તસ્મિન્નેવં ફલં વદેત્ ॥ ૭૩॥

સહજાધીશભૂપુત્રૌ દ્વૌ રન્ધ્રેશશનૈશ્ચરૌ ।
અસ્તૌ વા પાપદૃગ્યુક્તૌ સ્વલ્પમાયુઃ પ્રયચ્છતઃ ॥ ૭૪॥

ષષ્ઠેઽષ્ટમે વ્યયે વાઽપિ લગ્નેશે પાપસંયુતે ।
સ્વ પાયુરનપત્યો વા શુભદૃગ્યોગવર્જિતે ॥ ૭૫॥

ચતુષ્ટયગતે પાપે શુભદૃષ્ટિવિવર્જિતે ।
બલહીને વિગ્લનેશે સ્વલ્પમાયુર્વિનિર્દિશેત્ ॥ ૭૬॥

વ્યયાર્થૌ પાપસંયુક્તૌ શુભદૃગ્યોગવર્જિતૌ ।
સ્વલ્પમાયુસ્તદા જ્ઞેયં નિર્વિશંકં દ્વિજોત્તમ ॥ ૭૭॥

લગ્નરન્ધ્રેશયોરેવં દુઃસ્થયોર્બલહીનયોઃ ।
સ્વલ્પમાયુર્બુધૈર્જ્ઞેયં મિશ્રયોગાચ્ચ મધ્યમમ્ ॥ ૭૮॥

---

અથ મારકભેદાધ્યાયઃ ॥ ૪૪॥

બહુધાऽऽયુર્ભવા યોગાઃ કથિતા ભવતાऽધુના ।
નૃણાં મારકભેદાશ્ચ કથ્યન્તાં કૃપયા મુને ॥ ૧॥

તૃતીયમષ્ટમસ્થાનમાયુઃસ્થાનાં દ્વયં દ્વિજ ।
મારકં તદ્વ્યયસ્થાનં દ્વિતીયં સપ્તમં તથા ॥ ૨॥

તત્રાપિ સપ્તમસ્થાનાદ્ દ્વિતીયં બલવત્તરમ્ ।
તયોરીશૌ તત્ર ગતાઃ પાપિનસ્તેન સંયુતાઃ ॥ ૩॥

યે ખેટાઃ પાપિનસ્તે ચ સર્વે મારકસંજ્ઞકાઃ ।
તેષાં દશાવિપાકેષુ સમ્ભવે નિધનં નૃણામ્ ॥ ૪॥

અલ્પમધ્યમપૂર્ણાયુઃ પ્રમાણમિહ યોગજમ્ ।
વિજ્ઞાય પ્રથમં પુંસાં મારકં પરિચિન્તયેત્ ॥ ૫॥

અલાભે પુનરેતેષાં સમ્બન્ધેન વ્યયેશિતુઃ ।
ક્વચિચ્છુભાનાં ચ દશસ્વષ્ટમેશદશાસુ ચ ॥ ૬॥

કેવલાનાં ચ પાપાનાં દશાસુ નિધનં ક્વચિત્ ।
અલ્પનીયં બુધૈર્નૃણાં મારકાણામદર્શને ॥ ૭॥

સત્યપિ સ્વેન સમ્બન્ધે ન હન્તિ શુભભુક્તિષુ ।
હન્તિ સત્યપ્યસમ્બન્ધે મારકઃ પાપભુક્તિષુ ॥ ૮॥

મારકગ્રહસમ્બન્ધાન્નિહન્તા પાપકૃચ્છનિઃ ।
અતિક્રમ્યેતરાન્ સર્વાન્ ભવત્યત્ર ન સંશયઃ ॥ ૯॥

અથાऽન્યદપિ વક્ષ્યામિ દ્વિજ મારકલક્ષણમ્ ।
ત્રિવિધાશ્ચાયુષો યોગાઃ સ્વલ્પાયુર્મધ્યમોત્તમાઃ ॥ ૧૦॥

દ્વાવિંશાત્ પૂર્વમલ્પાયુર્મધ્યમાયુસ્તતઃ પરમ્ ।
ચતુષ્ષષ્ટ્યાઃ પુરસ્તાત્ તુ તતો દીર્ઘમુદાહૃતમ્ ॥ ૧૧॥

ઉત્તમાયુઃ શતાદૂર્ધ્વં જ્ઞાતવ્યં દ્વિજસત્તમ ।
જનૈર્વિંશતિવર્ષાન્ત્યમાયુર્જ્ઞાતં ન શક્યતે ॥ ૧૨॥

જપહોમચિકિત્સાદ્યૈર્બાલરક્ષાં હિ કારયેત્ ।
મ્રિયન્તે પિતૃદોષૈશ્ચ કેચિન્માતૃગ્રહૈરપિ ॥ ૧૩॥

કેચિત્ સ્વારિષ્ટયોગાચ્ચ ત્રિવિધા બાલમૃત્યવઃ ।

તતઃ પરં નૃણામાયુર્ગણયેદ્ દ્વિજસત્તમ ॥ ૧૪॥

અથાઽન્યદપિ વક્ષ્યામિ નૃણાં મારકલક્ષણમ્ ।
અલ્પાયુર્યોગજાતસ્ય વિપ્ભે ચ મૃતિર્ભવેત્ ॥ ૧૫॥

મધ્યાયુર્યોગજસ્યૈવં પ્રત્યરૌ ચ મૃતિર્ભવેત્ ।
દીર્ઘાયુર્યોગજાતસ્ય વધભે તુ મૃતિર્ભવેત્ ॥ ૧૬॥

દ્વાવિંશત્ર્યંશપશ્ચૈવ તથા વૈનાશિકાધિપઃ ।
વિપત્તારાપ્રત્યરીશા વધભેશંસ્તથૈવ ચ ॥ ૧૭॥

આદ્યાન્તપૌ ચ વિજ્ઞેયૌ ચન્દ્રાક્રાન્તગૃહાદ્ દ્વિજ ।
મારકૌ પાપખેટૌ તૌ શુભૌ ચેદ્રોગદૌ સ્મૃતૌ ॥ ૧૮॥

ષષ્ઠાધિપદશાયાં ચ નૃણાં નિધનસમ્ભવઃ ।
ષષ્ઠાષ્ટરિષ્ફનાથાનામપહારે મૃતિર્ભવેત્ ॥ ૧૯॥

મારકા બહવઃ ખેટા યદિ વીર્યસમન્વિતાઃ ।
તત્તદ્દશાન્તરે વિપ્ર રોગકષ્ટાદિસંભવઃ ॥ ૨૦॥

ઉક્તા યે મારકાસ્તેષુ પ્રબલો મુખ્યમારકઃ ।
તદવસ્થાનુસારેણ મૃતિં વા કષ્ટમાદિશેત્ ॥ ૨૧॥

રહુશ્ચેદથવા કેતુર્લગ્ને કામેઽષ્ટમે વ્યયે ।
મારકેશાન્મદે વાઽપિ મારકેશેન સંયુતઃ ॥ ૨૨॥

મારકઃ સ ચ વિજ્ઞેયઃ સ્વદશાન્તર્દશાસ્વપિ ।
મકરે વૃશ્ચિકે જન્મ રાહુસ્તસ્ય મૃતિપ્રદઃ ॥ ૨૩॥

ષષ્ઠાઽષ્ટરિષ્ફગો રાહુસ્તદ્દયે કષ્ટદો ભવેત્ ।
શુભગ્રહયુતો દૃષ્ટો ન તદા કષ્ટકૃન્મતઃ ॥ ૨૪॥

લગ્નાત્ તૃતીયભાવે તુ બલિના રવિણા યુતે ।
રાજહેતુશ્ચ મરણં તસ્ય જ્ઞેયં દ્વિજોત્તમ ॥ ૨૫॥

ત્રિતીયે ચેન્દુના યુક્તે દૃષ્ટે વા યક્ષ્મણા મૃતિઃ ।
કુજેન વ્રણશસ્ત્રાગ્નિદાહાદ્યૈર્મરણં ભવેત્ ॥ ૨૬॥

તૃતીયે શનિરાહુભ્યાં યુક્તે દૃષ્ટેઽપિ વા દ્વિજ ।
વિષાર્તિતો મૃતિર્વાઞ્ચા જલાદ્વા વહ્નિપીડનાત્ ॥ ૨૭॥

ગર્તાદુચ્ચાત્ પ્રપતનાદ્ બન્ધનાદ્ વા મૃતિર્ભવેત્ ।
તૃતીયે ચન્દ્રમાન્દિભ્યાં યુક્તે વા વીક્ષિતે દ્વિજ ॥ ૨૮॥

કૃમિકુષ્ઠાદિના તસ્ય મરણં ભવતિ ધ્રુવમ્ ।
તૃતીયે બુધસંયુક્તે વીક્ષિતે વાપિ તેન ચ ॥ ૨૯॥

જ્વરેણ મરણં તસ્ય વિજ્ઞેયં દ્વિજસત્તમ ।
તૃતીયે ગુરુણા યુક્તે દૃષ્ટે શોફાદિના મૃતિઃ ॥ ૩૦॥

તૃતીયે ભૃગુયુગ્દૃષ્ટે મેહરોગેણ તન્મૃતિઃ ।
બહુખેટયુતે તસ્મિન્ બહુરોગભવા મૃતિઃ ॥ ૩૧॥

તૃતીયે ચ શુભૈર્યુક્તે શુભદેશે મૃતિર્ભવેત્ ।
પાપૈશ્ચ કીકટે દેશે મિશ્રૈર્મિશ્રસ્થલે મૃતિઃ ॥ ૩૨॥

તૃતીયે ગુરુશુક્રાભ્યાં યુક્તે જ્ઞાનન વૈ મૃતિઃ ।
અજ્ઞાનેનાઽન્યખેટૈશ્ચ મૃતિર્જ્ઞેયા દ્વિજોત્તમ ॥ ૩૩॥

ચરરાશૌ તૃતીયસ્થે પરદેશે મૃતિર્ભવેત્ ।
સ્થિરરાશૌ સ્વગેહે ચ દ્વિસ્વભાવે પથિ દ્વિજ ॥ ૩૪॥

લગ્નાદષ્ટમભાવાચ્ચ નિમિત્તં કથિતં બુધૈઃ ।
સૂર્યેઽષ્ટમેઽગ્નિતો મૃત્યુશ્ચન્દ્રે મૃત્યુર્જલેન ચ ॥ ૩૫॥

શાસ્ત્રાદ્ ભૌમે જ્વરાજ્ જ્ઞે ચ ગુરૌ રોગાત્ ક્ષુધા ભૃગૌ ।
પિપાસયા શનૌ મૃત્યુર્વિજ્ઞેયો દ્વિજસત્તમ ॥ ૩૬॥

અષ્ટમે શુભદૃગ્યુક્તે ધર્મપે ચ શુભૈર્યુતે ।
તીર્થે મૃતિસ્તદા જ્ઞેયા પાપાખ્યૈરન્યથા મૃતિઃ ॥ ૩૭॥

અગ્ન્યમ્બુમિશ્રત્ર્યંશૈર્જ્ઞેયો મૃત્યુર્ગૃહાશ્રિતૈઃ ।
પરિણામઃ શવસ્યાઽત્ર ભસ્મસંક્લેદશોષકૈઃ ॥ ૩૮॥

વ્યાલવર્ગદૃકાણૈસ્તુ વિડમ્બો ભવતિ ધ્રુવમ્ ।
શવસ્ય શ્વશ‌ૃગાલાદ્યૈર્ગૃધ્રકાકાદિપક્ષિભિઃ ॥ ૩૯॥

કર્કટે મધ્યમોઽન્ત્યશ્ચ વૃશ્ચિકાદ્યદ્વિતીયકૌ ।
મીનેઽન્તિમસ્ત્રિભાગશ્ચ વ્યાલવર્ગાઃ પ્રકીર્તિતાઃ ॥ ૪૦॥

રવિશ્ચન્દ્રબલાક્રાન્તત્ર્યંશનાથે ગુરૌ જનઃ ।
દેવલોકાત્ સમાયાતો વિજ્ઞેયો દ્વિજસત્તમ ॥ ૪૧॥

શુક્રેન્દ્વોઃ પિતૃલોકાત્તુ મર્ત્યાચ્ચ રવિભૌમયોઃ ।
બુધાઽઽર્ક્યોર્નરકાદેવં જન્મકાલાદ્ વદેત્ સુધિઃ ॥ ૪૨॥

ગુરુશ્ચન્દ્રસિતૌ સૂર્યભૌમૌ જ્ઞાર્કી યથાક્રમમ્ ।
દેવેન્દુભૂમ્યધોલોકાન્ નયન્ત્યસ્તારિરન્ધ્રગાઃ ॥ ૪૩॥

અથ તત્ર ગ્રહભાવે રન્ધ્રારિત્ર્યંશનાથયોઃ ।
યો બલી સ નિજં લોકં નયત્યન્તે દ્વિજોત્તમ ॥ ૪૪॥

તસ્ય સ્વોચ્ચાદિ સંસ્થિત્યા વરમધ્યાઽધમાઃ ક્રમાત્ ।
તત્તલ્લોકેઽપિ સઞ્જાતા વિજ્ઞેયા દ્વિજસત્તમ ॥ ૪૫॥

અન્યાન્ મારકભેદાંશ્ચ રાશિગ્રહકૃતાન્ દ્વિજ ।
દશાધ્યાયપ્રસંગેષુ કથયિષ્યામિ સુવ્રત ॥ ૪૬॥

## અથ ગ્રહાવસ્થાધ્યાયઃ ॥ ૪૫॥

અવસ્થાવશતઃ પ્રોક્તં ગ્રહાણાં યત્ ફલં મુને ।
કા સાઽવસ્થા મુનિશ્રેષ્ઠ કતિધા ચેતિ કથ્યયામ્ ॥ ૧॥

અવસ્થા વિવિધાઃ સન્તિ ગ્રહાણાં દિવજસત્તમ ।
સારભૂતાશ્ચ યાસ્તાસુ બાલાદ્યાસ્તા વદામ્યહમ્ ॥ ૨॥

ક્રમાદ્ બાલઃ કુમારોઽથ યુવા વૃદ્ધસ્તથા મૃતઃ ।
ષડંશૈરસમે ખેટઃ સમે જ્ઞેયો વિપર્યયાત્ ॥ ૩॥

ફલં પાદમિતં બાલે ફલાર્ધં ચ કુમારકે ।
યૂનિ પૂર્ણં ફલં જ્ઞેયં વૃદ્ધે કિઞ્ચિત્ મૃતે ચ ખમ્ ॥ ૪॥

સ્વભોચ્ચયોઃ સમસુહૃદ્ભયોઃ શત્રુભનીચયોઃ ।
જાગ્રત્સ્વપ્નસુષુપ્ત્યાખ્યા અવસ્થા નામદૃક્ફલાઃ ॥ ૫॥

જાગરે ચ ફલં પૂર્ણં સ્વપ્ને મધ્યફલં તથા ।
સુષુપ્તૌ તુ ફલં શૂન્યં વિજ્ઞેયં દ્વિજસત્તમ ॥ ૬॥

દીપ્તઃ સ્વસ્થઃ પ્રમુદિતઃ શાન્તો દીનોઽથ દુઃખિતઃ ।
વિકલશ્ચ ખલઃ કોઽપીત્યવસ્થા નવધાઽપરાઃ ॥ ૭॥

સ્વોચ્ચસ્થઃ ખેચરો દીપ્તઃ સ્વર્ક્ષે સ્વસ્થોઽધિમિત્રભે ।

મુદિતો મિત્રભે શાન્તઃ સમભે દીન ઉચ્યતે ॥ ૮॥

શત્રુભે દુઃખિતઃ પ્રોક્તો વિકલઃ પાપસંયુતઃ ।
ખલઃ ખલગૃહે જ્ઞેયઃ કોપી સ્યાદર્કસંયુતઃ ॥ ૯॥

યાદૃશો જન્મકાલે યઃ ખેટો યદ્ભાવગો ભવેત્ ।
તાદૃશં તસ્ય ભાવસ્ય ફલમુહ્યં દ્વિજોત્તમ ॥ ૧૦॥

લજ્જિતો ગર્વિતશ્ચૈવ ક્ષુધિતસ્તૃષિતસ્તથા ।
મુદિતઃ ક્ષોભિતશ્ચૈવ ગ્રહભાવાઃ પ્રકીર્તિતાઃ ॥ ૧૧॥

પુત્રગેહગતઃ ખેટો રાહુકેતુયુતોઽથવા ।
રવિમન્દકુજૈર્યુક્તો લજ્જિતો ગ્રહ ઉચ્યતે ॥ ૧૨॥

તુઙ્ગસ્થાનગતો વાઽપિ ત્રિકોણેઽપિ ભવેત્પુનઃ ।
ગર્વિતઃ સોઽપિ ગદિતો નિર્વિશંકં દ્વિજોત્તમ ॥ ૧૩॥

શત્રુગેહી શત્રુયુક્તો રિપુદૃષ્ટો ભવેદ્યદિ ।
ક્ષુધિતઃ સ ચ વિજ્ઞેયઃ શનિયુક્તો યથા તથા ॥ ૧૪॥

જલરાશૌ સ્થિતઃ ખેટઃ શત્રુણા ચાઽવલોકિતઃ ।
શુભગ્રહા ન પશ્યન્તિ તૃષિતઃ સ ઉદાહૃતઃ ॥ ૧૫॥

મિત્રગેહી મિત્રયુક્તો મિત્રેણ ચ વિલોકિતઃ ।
ગુરુણા સહિતો યશ્ચ મુદિતઃ સ પ્રકીર્તિતઃ ॥ ૧૬॥

રવિણા સહિતો યશ્ચ પાપા પશ્યન્તિ સર્વથા ।
ક્ષોભિતં તં વિજાનીયાચ્છત્રુણા યદિ વીક્ષિતઃ ॥ ૧૭॥

યેષુ યેષુ ચ ભાવેષુ ગ્રહાસ્તિષ્ઠન્તિ સર્વથા ।
ક્ષુધિતઃ ક્ષોભિતો વાપિ તદ્ભાવફલનાશનઃ ॥ ૧૮॥

એવં ક્રમેણ બોદ્ધવ્યં સર્વભાવેષુ પણ્ડિતૈઃ ।
બલાઽબલવિચારેણ વક્તવ્યઃ ફલનિર્ણયઃ ॥ ૧૯॥

અન્યોન્યં ચ મુદા યુક્તં ફલં મિશ્રં વદેત્પુનઃ ।
બલહીને તદા હાનિઃ સબલે ચ મહાફલમ્ ॥ ૨૦॥

કર્મસ્થાને સ્થિતો યસ્ય લજ્જિતસ્તૃષિતસ્તથા ।
ક્ષુધિતઃ ક્ષોભિતો વાપિ સ નરો દુઃખભાજનમ્ ॥ ૨૧॥

સુતસ્થાને ભવેદ્યસ્ય લજ્જિતો ગ્રહ એવ ચ ।
સુતનાશો ભવેત્તસ્ય એકસ્તિષ્ઠતિ સર્વદા ॥ ૨૨॥

ક્ષોભિતસ્તૃષિતશ્ચૈવ સપ્તમે યસ્ય વા ભવેત્ ।
મ્રિયતે તસ્ય નારી ચ સત્યમાહુર્દ્વિજોત્તમ ॥ ૨૩॥

નવાલયારામસુખં નૃપત્વં કલાપટુત્વં વિદધાતિ પુંસામ્ ।
સદાર્થલાભં વ્યવહારવૃદ્ધિં ફલં વિશેષાદિહ ગર્વિતસ્ય ॥ ૨૪॥

ભવતિ મુદિતયોગે વાસશાલાવિશાલા ।
વિમલવસનભૂષાભૂમિયોષાસુ સૌખ્યમ્ ।
સ્વજનજનવિલાસો ભૂમિપાગારવાસો ।
રિપુનિવહવિનાશો બુદ્ધિવિદ્યાવિકાશઃ ॥ ૨૫॥

દિશતિ લજ્જિતભાવવશાદ્રતિં વિગતરામમતિં વિમતિક્ષયમ્ ।
સુતગદાગમનં ગમનં વૃથા કલિકથાભિરુચિં ન રુચિં શુભે ॥ ૨૬॥

સંક્ષોભિતસ્યાપિ ફલં વિશેષાદ્દ્રિદ્રજાતં કુમતિં ચ કષ્ટમ્ ।
કરોતિ વિત્તક્ષયમંઘ્રિબાધાં ધનાપ્તિબાધામવનીશકોપાત્ ॥ ૨૭॥

ક્ષુધિતખગવશાદ્વૈ શોકમોહાદિપાતઃ ।
પરિજનપરિતાપાદાધિભીત્યા કૃશત્વમ્ ।
કલિરપિ રિપુલોકૈરર્થબાધા નરાણા ।
મખિલબ્બલનિરોધો બુદ્ધિરોધો વિષાદાત્ ॥ ૨૮॥

તૃષિતખગભવે સ્વાદંગનાસંગમધ્યે ।
ભવતિ ગદવિકારો દૃષ્ટકાર્યાધિકારઃ ।
નિજજનપરિવાદાદર્થહાનિઃ કૃશત્વમ્ ।
ખલકૃતપરિતાપો માનહાનિઃ સદૈવ ॥ ૨૯॥

શયનં ચોપવેશં ચ નેત્રપાણિપ્રકાશનમ્ ।
ગમનાગમનં ચાઽથ સભાયાં વસતિં તથા ॥ ૩૦॥

આગમં ભોજનં ચૈવ નૃત્યં લિપ્સાં ચ કૌતુકમ્ ।
નિદ્રાં ગ્રહાણાં ચેષ્ટાં ચ કથયામિ તવાગ્રિતઃ ॥ ૩૧॥

યસ્મિન્નૃક્ષે ભવેત્ખેટસ્તેન તં પરિપૂરયેત્ ।
પુનરંશેન સમ્પૂર્ય સ્વનક્ષત્રં નિયોજયેત્ ॥ ૩૨॥

યાતદણ્ડં તથા લગ્નમેકીકૃત્ય સદા બુધઃ ।
રવિભિસ્તુ હરેદ્ ભાગં શેષં કાર્યે નિયોજયેત્ ॥ ૩૩॥

નાક્ષત્રિકદશારીત્યા પુનઃ પૂરણમાચરેત્ ।
નામાદ્યસ્વરસંખ્યાઢ્યં હર્તવ્યં રવિભિસ્તતઃ ॥ ૩૪॥

રવૌ પઞ્ચ તથા દેયાશ્ચન્દ્રે દદ્યાદ્દ્વયં તથા ।
કુજે દ્વયં ચ સંપ્રોક્તં બુધે ત્રીત્રિ નિયોજયેત્ ॥ ૩૫॥

ગુરૌ બાણાઃ પ્રદેયાશ્ચ ત્રયં દદ્યાચ્ચ ભાર્ગવે ।
શનૌ ત્રયમથો દેયં રાહૌ દદ્યાચ્ચતુષ્ટયમ્ ॥ ૩૬॥

ત્રિભિર્ભક્તં ચ શેષાંકૈઃ સા પુનસ્ત્રિબિધા સ્મૃતા ।
દષ્ટિશ્ચેષ્ટા વિચેષ્ટા ચ તત્ફલં તથયામ્યહમ્ ॥ ૩૭॥

દૃષ્ટૌ મધ્યફલં જ્ઞેયં ચેષ્ટાયાં વિપુલં ફલમ્ ।
વિચેષ્ટાયાં ફલં સ્વલ્પમેવં દૃષ્ટિફલં વિદુઃ ॥ ૩૮॥

શુભાઽશુભં ગ્રહાણાં ચ સમીક્ષ્યાઽથ બલાઽબલમ્ ।
તુઙ્ગસ્થાને વિશેષેણ બલં જ્ઞેયં તથા બુધૈઃ ॥ ૩૯॥

મન્દાગ્નિરોગો બહુધા નરાણાં સ્થૂલત્વમઙ્ઘ્રેરપિપિત્તકોપઃ ।
વ્રણં ગુદે શૂલમુરઃપ્રદેશે યદોષ્ણભાનુઃ શયનં પ્રયાતઃ ॥ ૪૦॥

દરિદ્રતાભારવિહારશાલી વિવાદવિદ્યાભિરતો નરઃ સ્યાત્ ।
કથોરચિત્તઃ ખલુ નષ્ટવિત્તઃ સૂર્યો યદા ચેદુપવેશનસ્થઃ ॥ ૪૧॥

નરઃ સદાનન્દધરો વિવેકી પરોપકારી બલવિત્તયુક્તઃ ।
મહામુખી રાજકૃપાભિમાની દિવાધિનાથો યદિ નેત્રપાનૌ ॥ ૪૨॥

ઉદારચિત્તઃ પરિપૂર્ણવિત્તઃ સભાસુ વક્તા બહુપુણ્યકર્ત્તા ।
મહાબલી સુન્દરરૂપશાલી પ્રકાશને જન્મનિ પદિમનીશે ॥ ૪૩॥

પ્રવાસશાલી કિલ દુઃખમાલી સદાલસી ધીધનવર્જિતશ્ચ ।
ભયાતુરઃ કોપપરો વિશેષાદ્દિવાધિનાથે ગમને મનુષ્યઃ ॥ ૪૪॥

પરદારરતો જનતારહિતો બહુધાગમને ગમનાભિરુચિઃ ।
ખલતાકુશલો મલિનો દિવસાધિપતૌ મનુજઃ કુમતિઃ કૃપણઃ ॥ ૪૫॥

સભાગતે હિતે નરઃ પરોપકારતત્પરઃ ।
સદાર્થરત્નપૂરિતો દિવાકરે ગુણાકરઃ ।

વસુન્ધરાનવાંબરાલયાન્વિતો મહાબલી ।
વિચિત્રમિત્રવત્સલઃ કૃપાકલાધરઃ પરઃ ॥ ૪૬॥

ક્ષોભિતો રિપુગણૈઃ સદા નરશ્ચઞ્ચલઃ ખલમતિઃ કૃશસ્તથા ।
ધર્મકર્મરહિતો મદોદ્ધતશ્ચાગમે દિનપતૌ તદા તદા ॥ ૪૭॥

સદાઙ્ગસન્ધિવેદનાપરાઙ્ગનાધનક્ષયો ।
બલક્ષયઃ પદે પદે યદા યદા હિ ભોજને ।
અસત્યતા શિરોવ્યથા તથા વૃથાન્નભોજનમ્ ।
રવાવસત્તથારતિઃ કુમાર્ગગામિની મતિ ॥ ૪૮॥

વિજ્ઞલોકૈઃ સ્દા મણ્ડિતઃ પણ્ડિતઃ કાવ્યવિદ્યાનવદ્યપ્રલાપાન્વિતઃ ।
રાજપૂજ્યો ધરામણ્ડલે સર્વદા નૃત્યલિપ્સાગતે પદ્મિનીનાયકે ॥ ૪૯॥

સર્વદાનન્દધર્તા જનો જ્ઞાનવાન્ યજ્ઞકર્તા ધરાધીશસદ્મસ્થિતઃ ।
પદ્મબન્ધાવરાતેર્ભયં સ્વાનનઃ કાવ્યવિદ્યાપ્રલાપી મુદા કૌતુકે ॥ ૫૦॥

નિદ્રાભરારક્તનિભે ભવેતાં નિદ્રાગતે લોચનપદ્મયુગ્મે ।
રવૌ વિદેશે વસતિર્જનસ્ય કલત્રહાનિઃ કાતિધાર્થનાશઃ ॥ ૫૧॥

જાનુઃકાલે ક્ષપાનાથે શયનં ચેદુપાગતે ।
માની શીતપ્રધાનશ્ચ કામી વિત્તવિનાશકઃ ॥ ૫૨॥

રોગાર્દિતો મન્દમતિર્વિશેષાદ્વિત્તેન હીનો મનુજઃ કઠોરઃ ।
અકાર્યકારી પરવિત્તહારી ક્ષપાકરે ચેદુપવેશનસ્થે ॥ ૫૩॥

નેત્રપાણૌ ક્ષપાનાથે મહારોગી નરો ભવેત્ ।
અનલ્પજલ્પકો ધૂર્તઃ કુકર્મનિરતઃ સદા ॥ ૫૪॥

યદા રાકાનાથે ગતવતિ વિકાશં ચ જનને ।
વિકાશઃ સંસારે વિમલગુણરાશેરવનિપાત્ ।
નવાશામાલા સ્યાત્કરિતુરગલક્ષ્મ્યા પરિવૃતા ।
વિભૂષા યોષાભિઃ સુખમનુદિનં તીર્થગમનમ્ ॥ ૫૫॥

સિતેતરે પાપરતો નિશાકરે વિશેષતઃ ક્રૂરકરો નરો ભવેત્ ।
સદાક્ષિરોગૈઃ પરિપીડ્યમાનો વલક્ષપક્ષે ગમને ભયાતુરઃ ॥ ૫૬॥

વિધાવાગમગે માની પાદરોગી નરો ભવેત્ ।
ગુપ્તપાપરતો દીનો મતિતોષવિવર્જિતઃ ॥ ૫૭॥

સકલજનવદાન્યો રાજરાજેન્દ્રમાન્યો ।
રતિપતિસમાકાન્તિઃ શાન્તિકૃત્કામિનીનામ્ ।
સપદિ સદસિ યાતે ચારુબિમ્બે શશંકે ।
ભવતિ પરમરીતિપ્રીતિવિજ્ઞો ગુણજ્ઞઃ ॥ ૫૮॥

વિધાવાગમકે મર્ત્યો વાવાલો ધર્મપૂરિતઃ ।
કૃષ્ણપક્ષે દ્વિભાર્યઃ સ્યાદ્રોગી દુષ્ટતરો હઠી ॥ ૫૯॥

ભોજને જનુષિ પૂર્ણચન્દ્રમા માનયાનજનતાસુખં નૃણામ્ ।
આતનોતિ વનિતાસુતાસુખં સર્વમેવ ન સિતેતરે શુભમ્ ॥ ૬૦॥

નૃત્યલિપ્સાગતે ચન્દ્રે સબલે બલવાન્નરઃ ।
ગીતજ્ઞો હિ રસજ્ઞશ્ચ કૃષ્ણે પાપકરો ભવેત્ ॥ ૬૧॥

કૌતકભવનં ગતવતિ ચન્દ્રે ભવતિ નૃપત્વં વા ધનપત્વમ્ ।
કામકલાસુ સદા કુશલત્વં વારવધૂરતિતમણપટુત્વમ્ ॥ ૬૨॥

નિદ્રાગતે જન્મનિ માનવાનાં કલાધરે જીવયુતે મહત્ત્વમ્ ।
હીનેઽઙ્ગનાસઞ્ચિતવિત્તનાશઃ શિવાલયે રૌતિ વિચિત્રમુચ્ચૈઃ ॥ ૬૩॥

શયને વસુધાપુત્રે વ્રણયુક્તો જનો ભવેત્ ।
બહુના કણ્ડુના યુક્તો દદ્રુણા ચ વિશેષતઃ ॥ ૬૪॥

બલી સદા પાપરતો નરઃ સ્યાદસત્યવાદી નિતરાં પ્રગલ્ભઃ ।
ધનેન પૂર્ણો નિજધર્મહીનો ધરાસુતશ્ચેદુપવેશનસ્થઃ ॥ ૬૫॥

યદા ભૂમિસુતો લગ્ને નેત્રપાણિમુપાગતઃ ।
દરિદ્રતા તદા પુંસામન્યભે નગરેશતા ॥ ૬૬॥

પ્રકાશો ગુણસ્યાપિ વાસઃ પ્રકાશે ધરાધીશભ્રતુઃ સદા માનવૃદ્ધિઃ ।
સુતે ભૂસુતે પુત્રકાન્તાવિયોગો ભવેદ્રાહુણા દારુણો વા નિપાતઃ ॥ ૬૭॥

ગમને ગમનં કુરુતેઽનુદિનં વ્રણજાલભયં વનિતાકલહઃ ।
બહુદદ્રુકકણ્ડુભયં બહુધા વસુધાતનયો વસુહાનિકરઃ ॥ ૬૮॥

આગમને ગુણશાલી મણિમાલીવા કરાલકરવાલી ।
ગજહન્તા રિપુહન્તા પરિજનસન્તાપહારકો ભૌમે ॥ ૬૯॥

તુઙ્ગે યુદ્ધકલાકલાપકુશલો ધર્મધ્વજો વિત્તપઃ ।
કોણે ભૂમિસુતે સભામુપગતે વિદ્યાવિહીનઃ પુમાન્ ।

અન્તેઽપત્યકલત્રમિત્રરહિતઃ પ્રોક્તેતરસ્થાનગે ।
ઽવશ્યં રાજસભાબુધો બહુધની માની ચ દાની જનઃ ॥ ૭૦॥

આગમે ભવતિ ભૂમિજે જનો ધર્મકર્મરહિતો ગદાતુરઃ ।
કર્ણમૂલગુરુશૂલરોગવાનેવ કાતરમતિઃ કુસઙ્ગમી ॥ ૭૧॥

ભોજને મિષ્ટભોજી ચ જનને સબલે કુજે ।
નીચકર્મકરો નિત્યં મનુજો માનવર્જિતઃ ॥ ૭૨॥

નૃત્યલિપ્સાગતે ભૂસુતે જન્મિનામિન્દિરારાશિરાયાતિ ભૂમીપતેઃ ।
સ્વર્નરત્નપ્રવાલૈઃ સદા મણ્ડિતા વાસશાલા નરાણાં ભવેત્સર્વદા ॥ ૭૩॥

કૌતુકી ભવ્તિ કૌતુકે કુજે મિત્રપુત્રપરિપૂરિતો જનઃ ।
ઉચ્ચગે નૃપતિગેહમણ્ડિતઃ પૂજિતો ગુણવરૈર્ગુણાકરૈઃ ॥ ૭૪॥

નિદ્રાવસ્થાં ગતે ભૌમે ક્રોધી ધીધનવર્જિતઃ ।
ધૂર્તો ધર્મપરિભ્રષ્ટો મનુષ્યો ગદપીડિતઃ ॥ ૭૫॥

ક્ષુધાતુરો ભવેદંગે ખઞ્જો ગુઞ્જાનિભેક્ષણઃ ।
અન્યભે લમ્પટો ધૂર્તો મનુજઃ શયને બુધે ॥ ૭૬॥

શશાંકપુત્રે જનુરઙ્ગગેહે યદોપવેશે ગુણરાશિપૂર્ણઃ ।
પાપેક્ષિતે પાપયુતે દરિદ્રો હિતે શુભે વિત્તસુખી મનુષ્યઃ ॥ ૭૭॥

વિદ્યાવિવેકરહિતો હિતતોષહીનો મની ।
જનોભવતિ ચન્દ્રસુતેઽક્ષિ પાણૌ ।
પુત્રાલયે સુતકલત્રસુખેન હીનઃ કન્યા ।
પ્રજા નૃપતિગેહબુધો વરાર્થઃ ॥ ૭૮॥

દાતા દયાલુઃ ખલુ પુણ્યકર્તા વિકાશને ચન્દ્રસુતે મનુષ્યઃ ।
અનેકવિદ્યાર્ણવપારઙ્ગતા વિવેકપૂર્ણઃ ખલવર્ગહન્તા ॥ ૭૯॥

ગમનાગમને ભવતો ગમને બહુધા વસુધાધિપતેર્ભવને ।
ભવનં ચ વિચિત્રમલં રમયા વિદિ નુશ્ચ જનુઃસમયે નિતરામ્ ॥ ૮૦॥

સપદિ વિદિ જનાનામુચ્ચગે જન્મકાલે ।
સદસિ ધનસમૃદ્ધિઃ સર્વદા પુણ્યવૃદ્ધિઃ ।
ધનપતિસમતા વા ભૂપતા મંત્રિતા વા ।
હરિહરપદભક્તિઃ સાત્ત્વિકી મુક્તિલબ્ધિઃ ॥ ૮૧॥

આગમે જનુષિ જન્મિનાં યદા ચન્દ્રજે ભવતિ હીનસેવયા ।
અર્થસિદ્ધિરપિ પુત્રયુગ્મતા બાલિકા ભવતિ માનદાયિકા ॥ ૮૨॥

ભોજને ચન્દ્રજે જન્મકાલે યદા જન્મિનાનર્થહાનિઃ સદા વાદતઃ ।
રાજભીત્યા કૃશત્વંચલત્વં મતેરઙ્ગસઙ્ગો ન જાયા ન જાયાસુખમ્ ॥ ૮૩॥

નૃત્યલિપ્સાગતે ચન્દ્રજે માનવો માનયાનપ્રવાલવ્રજૈઃ સંયુતઃ ।
મિત્રપુત્રપ્રતાપૈઃ સભાપણ્ડિતઃ પાપભે વારવામારતો લમ્પટઃ ॥ ૮૪॥

કૌતુકે ચન્દ્રજે જન્મકાલે નૃણામંગભે ગીતવિદ્યાઽનવદ્યા ભવેત્ ।
સપ્તમે નૈધને વારવધ્વા રતિઃ પુણ્યભે પુણ્યયુક્તા મતિઃ સદ્ગતિઃ ॥ ૮૫॥

નિદ્રાશ્રિતે ચન્દ્રસુતે ન નિદ્રાસુખં સદા વ્યાધિસમાધિયોગઃ ।
સહોત્થવૈકલ્યમનલ્પતાપો નિજેન વાદો ધનમાનનાશઃ ॥ ૮૬॥

વચસામધિપે તુ જનુઃસમયે શયને બલવાનપિ હીનરવઃ ।
અતિગૌરતનુઃ ખલુદીર્ઘહનુઃ સુતરામરિભીતિયુતો મનુજઃ ॥ ૮૭॥

ઉપવેશં ગતવતિ યદિ જીવે વાચાલો બહુગર્વપરીતઃ ।
ક્ષોણીપતિરિપુજનપતિર્તપ્તઃ પદજંઘાસ્યકરવ્રણયુક્તઃ ॥ ૮૮॥

નેત્રપાણિં ગતે દેવરાજાર્ચિતે રોગયુક્તો વિયુક્તો વરાર્થશ્રિયા ।
ગીતનૃત્યપ્રિયઃ કામુકઃ સર્વદા ગૌરવર્ણો વિવર્ણોદ્ભવપ્રીતિયુક્ ॥ ૮૯॥

ગુણાનામાનન્દં વિમલસુખકન્દં વિતનુતે ।
સદા તેજઃપુઞ્જં વ્રજપતિનિકુઞ્જં પ્રતિગમમ્ ।
પ્રકાશં ચેદુચ્ચે દ્રુતમુપગતો વાસવગુરુ ।
ર્ગુરુત્વં લોકાનાં ધનપતિસમત્વં તનુભૃતામ્ ॥ ૯૦॥

સાહસી ભવતિ માનવઃ સદા મિત્રવર્ગસુખપૂરિતો મુદા ।
પણ્ડિતો વિવિધવિત્તમણ્ડિતો દેવવિદ્યદિ ગુરૌ ગમં ગતે ॥ ૯૧॥

આગમને જનતા વરજાયા યસ્ય જનુઃસમયે હરિમાયા ।
મુઞ્ચતિ નાલમિહાલયમદ્ધા દેવગુરૌ પરિતઃ પરિબદ્ધા ॥ ૯૨॥

સુરગુરુસમવક્તા શુભ્રમુક્તાફલાઢ્યઃ ।
સદસિ સપદિ પૂર્ણો વિત્તમાણિક્યમાનૈઃ ।
ગજતુરગરથાઢ્યો દેવતાધીશપૂજ્યો ।
જનુષિ વિવિધવિદ્યાગર્વિતો માનવઃ સ્યાત્ ॥ ૯૩॥

નાનાવાહનમાનયાનપટલીસૌખ્યં ગુરાવાગમે ।
ભૃત્યાપત્યકલત્રમિત્રજસુખં વિદ્યાઽનવદ્યા ભવેત્ ।
ક્ષોણીપાલસમાનતાનવરતં ચાઽતીવ હૃદ્યા મતિઃ ।
કાવ્યાનન્દરતિઃ સદા હિનગતિઃ સર્વત્ર માનોન્નતિઃ ॥ ૯૪॥

ભોજને ભવતિ દેવતાગુરૌ યસ્ય તસ્ય સતતં સુભોજનમ્ ।
નૈવ મુઞ્ચતિ રમાલયં તદા વાજિવારણરથૈશ્ચ મણ્ડિતમ્ ॥ ૯૫॥

નૃત્યલિપ્સાગતે રાજમાની ધની દેવતાધીશવન્દ્યઃ સદા ધર્મવિત્ ।
તન્ત્રવિજ્ઞો બુધૈર્મણ્ડિતઃ પંડિતઃ શબ્દવિદ્યાનવિદ્યો હિ સદ્યો જનઃ ॥ ૯૬॥

કુતૂહલી સકૌતુકે માહાધની જનઃ સદા ।
નિજાન્વયે ચ ભાસ્કરઃ કૃપાકલાધરઃ સુખી ।
નિલિમ્પરાજપૂજિતે સુતેન ભૂનયેન વા ।
યુતો મહાબલી ધરાધિપેન્દ્રસદ્મપણ્ડિતઃ ॥ ૯૭॥

ગુરૌ નિદ્રાગતે યસ્ય મૂર્ખતા સર્વકર્મણિ ।
દરિદ્રતાપરિક્રન્તં ભવનં પુણ્યવર્જિતમ્ ॥ ૯૮॥

જનો બલીયાનપિદન્તરોગી ભૃગૌ મહારોષસમન્વિતઃ સ્યાત્ ।
ધનેન હીનઃ શયનં પ્રયાતે વારાંગનાસંગમલમ્પટશ્ચ ॥ ૯૯॥

યદિ ભવેદુશના ઉપવેશને નવમણિવ્રજકાઞ્ચનભૂષણૈઃ ।
સુખમજસ્રમરિક્ષય આદરાદવનિપાદપિ માનસમુન્નતિઃ ॥ ૧૦૦॥

નેત્રપાણિંગતે લગ્નગેહે કવૌ સપ્તમે માનભે યસ્ય તસ્ય ધ્રુવમ્ ।
નેત્રપાતે નિપાતો ધનાનામલં ચાન્યભે વાસશાલા વિશાલા ભવેત્ ॥ ૧૦૧॥

સ્વાલયે તુંગભે મિત્રભે ભાર્ગવે તુંગમાતંગલીલાકલાપી જનઃ ।
ભૂપતેસ્તુલ્ય એવ પ્રકાશં ગતે કાવ્યવિદ્યાકલાકૈતુકી ગીતવિત્ ॥ ૧૦૨॥

ગમને જનને શુક્રે તસ્ય માતા ન જીવતિ ।
આધિયોગો વિયોગશ્ચ જનાનામરિભીતિતઃ ॥ ૧૦૩॥

આગમનં ભૃગુપુત્રે ગતવતિ વિત્તેશ્વરો મનુજઃ ।
સત્તેર્થભ્રમશાલી નિત્યોત્સાહી કરાંઘ્રિરોગી ચ ॥ ૧૦૪॥

અનાયાસેનાલં સપદિ મહસા યાતિ સહસા ।
પ્રગલ્ભત્વંરાજ્ઞઃ સદસિ ગુણવિજ્ઞઃ કિલ કવૌ ।

સભાયામાયાતે રિપુનિવહહન્તા ધનપતેઃ ।
સમત્વં વા દાતા બલતુરગગન્તા નરવરઃ ॥ ૧૦૫॥

આગમે ભાર્ગવે માગમો જન્મિનામર્થરાશેરરાતેરતીવ ક્ષતિઃ ।
પુત્રપાતો નિપાતો જનાનામપિવ્યાધિભીતિઃ પ્રિયાભોગહાનિર્ભવેત્ ॥ ૧૦૬॥

ક્ષુધાતુરો વ્યાધિનિપીડિતઃ સ્યાદનેકધારાતિભયર્દ્દિતશ્ચ ।
કવૌ યદા ભોજનગે યુવત્યા મહાધની પણ્ડિતમણ્ડિતશ્ચ ॥ ૧૦૭॥

કાવ્યવિદ્યાનવદ્યા ચ હૃદ્યા મતિઃ સર્વદા નૃત્યલિપ્સાગતે ભાર્ગવે ।
શંખવીણામૃદંગાદિગાનધ્વનિવ્રાતનૈપુણ્યમેતસ્ય વિત્તોન્નતિઃ ॥ ૧૦૮॥

કૌતુકભવનં ગતવતિ શુક્રે શક્રેશત્વં સદસિ મહત્ત્વમ્ ।
હૃદ્યા વિદ્યા ભવિતિ ચ પુંસઃ પદમા નિવસતિ સદમારતઃ ॥ ૧૦૯॥

પરસેવારતો નિત્યં નિદ્રામુપગતે કવૌ ।
પરનિન્દાપરો વીરો વાચાલો ભ્રમતે મહીમ્ ॥ ૧૧૦॥

ક્ષુત્પિપાસાપરિક્રાન્તો વિશ્રાન્તઃ શયને શનૌ ।
વયસિ પ્રથમે રોગી તતો ભાગ્યવતાં વરઃ ॥ ૧૧૧॥

ભાનઓઃ સુતે ચેદુપવેશનસ્થે કરાલકારાતિજનાનુતપ્તાઃ ।
અપાયુશાલી ખલુ દદ્રુમાલી નરોભિમાની નૃપદણ્ડયુક્તઃ ॥ ૧૧૨॥

નયનપાણિગતે રવિનન્દને પરમયા રમયા રમયાયુતઃ ।
નૃપતિતો હિતતો મહિતોષકૃદ્બહુકલાકલિતો વિમલોક્તિકૃત્ ॥ ૧૧૩॥

નાનાગુણગ્રામધનાધિશાલી સદા નરો બુદ્ધિવિનોદમાલી ।
પ્રકાશને ભાનુસુતે સુભાનુઃ કૃપાનુતક્તો હરપાદભક્તઃ ॥ ૧૧૪॥

મહાધની નન્દનનન્દિતઃ સ્યાદપાયકારી રિપુભૂમિહારી ।
ગમે શનૌ પણ્ડિતરાજાભાવં ધરાપતેરાયાતને પ્રયાતિ ॥ ૧૧૫॥

આગમને ગર્દભપદયુક્તઃ પુત્રકલત્રસુખેન વિમુક્તઃ ।
ભાનુસુતે ભ્રમતે ભુવિ નિત્યં દીનમના વિજનાશ્રયભાવમ્ ॥ ૧૧૬॥

રત્નાવલીકાઞ્ચનમૌક્તિકાનાં વ્રાતેન નિત્યં વ્રજતિ પ્રમોદમ્ ।
સભાગતે ભાનુસુતે નિતાન્તં નયેન પૂર્ણો મનુજો મહૌજાઃ ॥ ૧૧૭॥

આગમે ગદસમાગમો નૃણામબ્જબન્ધુતનયે યદા તદા ।
મન્દમેવ ગમનં ધરાપતેર્યાચનાવિરહિતા મતિઃ સદા ॥ ૧૧૮॥

સંગતે જનુષિ ભાનુનન્દને ભોજનં ભવતિ ભોજનં રસૈઃ ।
સંયુતં નયનમન્દતા તતા મોહતાપપરિતાપિતા મતિઃ ॥ ૧૧૯॥

નૃત્યલિપ્સાગતે મન્દે ધર્માત્મા વિત્તપૂરિતઃ ।
રાજપૂજ્યો નરો ધીરો મહાવીરો રણાઙ્ગણે ॥ ૧૨૦॥

ભવતિ કૌતકભાવમુપાગતે રવિસુતે વસુધાવસુપૂરિતઃ ।
અતિસુખી સુમુખીસુખપૂરિતઃ કવિતયામલયા કલયાનરઃ ॥ ૧૨૧॥

નિદ્રાગતે વાસરનાથપુત્રે ધની સદા ચારુગુણૈરુપેતઃ ।
પરાક્રમી ચણ્ડવિપક્ષહન્તા સુવારકાન્તારતિરીતિવિજ્ઞઃ ॥ ૧૨૨॥

યદાગમો જન્મનિ યસ્ય રાહૌ ક્લેશાધિકત્વં શયનં પ્રયાતે ।
વૃષેઽથ યુગ્મેઽપિ ચ કન્યકાયામજે સમાજો ધનધાન્યરાશેઃ ॥ ૧૨૩॥

ઉપવેશનમિહ ગતવતિ રાહૌ દદ્રુગદેન જનઃ પરિતપ્તઃ ।
રાજસમાજયુતો બહુમાની વિત્તસુખેન સદા રહિતઃ સ્યાત્ ॥ ૧૨૪॥

નેત્રપાણાવગૌ નેત્રે ભવતો રોગપીડિતે ।
દુષ્ટવ્યાલારિચૌરાણાં ભયં તસ્ય ધનક્ષયઃ ॥ ૧૨૫॥

પ્રકાશને શુભાસને સ્થિતિઃ કૃતિઃ શુભા નૃણામ્ ।
ધનોન્નતિર્ગુણોન્નતિઃ સદા વિદામગાવિહ ।
ધરાધિપાધિકારિતા યશોલતા તતા ભવે ।
ન્નવીનનીરદાકૃતિર્વિદેશતો મહોન્નતિઃ ॥ ૧૨૬॥

ગમને ચ યદા રાહૌ બહુસન્તાનવાન્નરઃ ।
પણ્ડિતો ધનવાન્ દાતા રાજપૂજ્યો નરો ભવેત્ ॥ ૧૨૭॥

રાહાવાગમને ક્રોધી સદા ધીધનવર્જિતઃ ।
કુટિલઃ કૃપણઃ કામી નરો ભવતિ સર્વથા ॥ ૧૨૮॥

સભાગતો યદા રાહુઃ પણ્ડિતઃ કૃપણો નરઃ ।
નાનાગુણપરિક્રાન્તો વિત્ત સૌખ્યસમન્વિતઃ ॥ ૧૨૯॥

ચેદગાવાગમં યસ્ય યાતે તદા વ્યાકુલત્વં સદારાતિભીત્યા ભયમ્ ।
મહદ્બન્ધુવાદો જનાનાં નિપાતો ભવેદ્વિત્તહાનિઃ શઠત્વં કૃશત્વમ્ ॥ ૧૩૦॥

ભોજને ભોજનેનાલં વિકલો મનુજો ભવેત્ ।

મન્દબુદ્ધિઃ ક્રિયાભીરુઃ સ્ત્રીપુત્રસુખવર્જિતઃ ॥ ૧૩૧॥

નૃત્યલિપ્સાગતે રાહૌ મહાવ્યાધિવિવર્દ્ધનમ્ ।
નેત્રરોગી રિપોર્ભીતિર્ધનધર્મક્ષયો નૃણામ્ ॥ ૧૩૨॥

કૌતુકે ચ યદા રાહૌ સ્થાનહીનો નરો ભવેત્ ।
પરદારરતો નિત્યં પરવિત્તાપહારકઃ ॥ ૧૩૩॥

નિદ્રાવસ્થાં ગતે રાહૌ ગુણગ્રામયુતો નરઃ ।
કાન્તાસન્તાનવાન્ ધીરો ગર્વિતો બહુવિત્તવાન્ ॥ ૧૩૪॥

મેષે વૃષેઽથ વા યુગ્મે કન્યયાં શયનં ગતે ।
કેતૌ ધનસમૃદ્ધિઃ સ્યાદન્યભે રોગવર્ધનમ્ ॥ ૧૩૫॥

ઉપવેશં ગતૌ કેતૌ દદ્રુરોગવિવર્દ્ધનમ્ ।
અરિવાતનૃપવ્યાલચૈરશંકા સમન્તતઃ ॥ ૧૩૬॥

નેત્રપાણિં ગતે કેતૌ નેત્રરોગઃ પ્રજાયતે ।
દુષ્ટસર્પાદિભીતિશ્ચ રિપુરાજકુલાદપિ ॥ ૧૩૭॥

કેતૌ પ્રકાશને સંજ્ઞે ધનવાન્ ધાર્મિકઃ સદા ।
નિત્યં પ્રવાસી ચોત્સાહી સાત્ત્વિકો રાજસેવકઃ ॥ ૧૩૮॥

ગમેચ્છાયાં ભવેત્કેતુર્બહુપુત્રો મહાધનઃ ।
પણ્ડિતો ગુણવાન્ દાતા જાયતે ચ નરોત્તમઃ ॥ ૧૩૯॥

આગમને ચ યદા કેતુર્નાનારોગો ધનક્ષયઃ ।
દન્તઘાતી મહારોગી પિશુનઃ પરનિન્દકઃ ॥ ૧૪૦॥

સભાવસ્થાં ગતે કેતૌ વાચાલો બહુગર્વિતઃ ।
કૃપણો લમ્પટશ્ચૈવ ધૂર્તવિદ્યાવિશારદઃ ॥ ૧૪૧॥

યદાગમે ભવેત્કેતુઃ કેતુઃ સ્યાત્પાપકર્મણામ્ ।
બન્ધુવાદરતો દુષ્ટો રિપુરોગનિપીડિતઃ ॥ ૧૪૨॥

ભોજને તુ જનો નિત્યં ક્ષુધયા પરિપીડિતઃ ।
દરિદ્રો રોગસંતપ્તઃ કેતૌ ભ્રામતિ મેદિનીમ્ ॥ ૧૪૩॥

નૃત્યલિપ્સાઙ્ગતે કેતૌ વ્યાધિના વિકલો ભવેત્ ।
બુદ્બુદાક્ષો દુરાધર્ષો ધૂર્તોઽનર્થકરો નરઃ ॥ ૧૪૪॥

કૌતુકી કૌતુકે કેતૌ નટવામારતિપ્રિયઃ ।
સ્થાનભ્રષ્ટો દુરાચારી દરિદ્રો ભ્રમતે મહીમ્ ॥ ૧૪૫॥

નિદ્રાવસ્થાં ગતે કેતૌ ધનધાન્યસુખં મહત્ ।
નાનાગુણવિનોદેન કાલો ગચ્છતિ જન્મિનામ્ ॥ ૧૪૬॥

શયને દ્વિજ ભાવેષુ યત્ર તિષ્ઠન્તિ સદ્ગ્રહાઃ ।
નિત્યં તસ્ય શુભજ્ઞાનં નિર્વિશંકં વદેત્ બુધઃ ॥ ૧૪૭॥

ભોજને યેષુ ભાવેષુ પાપાસ્તિષ્ઠન્તિ સર્વથા ।
તદા સર્વવિનાશેઽપિ નાઽત્ર કાર્યા વિચારણા ॥ ૧૪૮॥

નિદ્રાયાં ચ યદા પાપો જાયાસ્થાને શુભં વદેત્ ।
યદિ પાપગ્રહૈર્દૃષ્ટો ન શુભં ચ કદાચન ॥ ૧૪૯॥

સુતસ્થાને સ્થિતઃ પાપો નિદ્રાયાં શયનેઽપિ વા ।
તદા શુભં વદેત્તસ્ય નાઽત્ર કાર્યા વિચારણા ॥ ૧૫૦॥

મૃત્યુસ્થાનસ્થિતઃ પાપો નિદ્રાયાં શયનેઽપિ વા ।
તદા તસ્યાઽપમૃત્યુઃ સ્યાદ્રાજતઃ પરતસ્તથા ॥ ૧૫૧॥

શુભગ્રહૈર્યદા યુક્તઃ શુભૈર્વા યદિ વીક્ષિતઃ ।
તદા તુ મરણં તસ્ય ગઙ્ગાદૌ ચ વિશેષતઃ ॥ ૧૫૨॥

કર્મસ્થાને યદા પાપઃ શયને ભોજનેઽપિ વા ।
તદા કર્મવિપાકઃ સ્યાન્નાનાદુઃખપ્રદાયકઃ ॥ ૧૫૩॥

દશમસ્થો નિશાનાથઃ કૌતુકે ચ પ્રકાશને ।
તદૈવ રાજયોગઃ સ્યાન્નિર્વિશકં દ્વિજોત્તમ ॥ ૧૫૪॥

બલાઽબલવિચારેણ જ્ઞાતવ્યઞ્ચ શુભાઽશુભમ્ ।
એવં ક્રમેણ બોદ્ધવ્યં સર્વાભાવેષુ બુદ્ધિમન્ ॥ ૧૫૫॥

Encoded and proofread by ajarve at fms30.cca.rockwell.com (Ahto Jarve)

*bRihatpArAsharahorAshAstramh 41-45*

pdf was typeset on March 11, 2023

Please send corrections to *sanskrit@cheerful.com*